साहित्य

Set No. 1

Question Booklet No. 00082

# 12P/251/31

*(To be filled up by the candidate by blue/black ball-point pen)*

Roll No. | | | | | | | | |

Roll No. (Write the digits in words) ..............................................................................

Serial No. of Answer Sheet ............................................

Day and Date .................................................................. ..........................................

( Signature of Invigilator )

## INSTRUCTIONS TO CANDIDATES

(Use only ***blue/black ball-point pen*** in the space above and on both sides of the **Answer Sheet**)

1. Within 10 minutes of the issue of the Question Booklet, check the Question Booklet to ensure that it contains all the pages in correct sequence and that no page/question is missing. In case of faulty Question Booklet bring it to the notice of the Superintendent/Invigilators immediately to obtain a fresh Question Booklet.
2. Do not bring any loose paper, written or blank, inside the Examination Hall ***except the Admit Card without its envelope***.
3. ***A separate Answer Sheet is given. It should not be folded or mutilated. A second Answer Sheet shall not be provided. Only the Answer Sheet will be evaluated.***
4. Write your Roll Number and Serial Number of the Answer Sheet by pen in the space prvided above.
5. ***On the front page of the Answer Sheet, write by pen your Roll Number in the space provided at the top and by darkening the circles at the bottom. Also, wherever applicable, write the Question Booklet Number and the Set Number in appropriate places.***
6. ***No overwriting is allowed in the entries of Roll No., Question Booklet no. and Set no. (if any) on OMR sheet and Roll No. and OMR sheet no. on the Queston Booklet.***
7. ***Any change in the aforesaid entries is to be verified by the invigilator, otherwise it will be taken as unfairmeans.***
8. ***Each question in this Booklet is followed by four alternative answers. For each question, you are to record the correct option on the Answer Sheet by darkening the appropriate circle in the corresponding row of the Answer Sheet, by pen as mentioned in the guidelines given on the first page of the Answer Sheet.***
9. For each question, darken only one circle on the Answer Sheet. If you darken more than one circle or darken a circle partially, the answer will be treated as incorrect.
10. *Note that the answer once filled in ink cannot be changed. If you do not wish to attempt a question, leave all the circles in the corresponding row blank (such question will be awarded zero marks).*
11. For rough work, use the inner back page of the title cover and the blank page at the end of this Booklet.
12. Deposit only **OMR** ***Answer Sheet*** at the end of the Test.
13. You are not permitted to leave the Examination Hall until the end of the Test.
14. If a candidate attempts to use any form of unfair means, he/she shall be liable to such punishment as the University may determine and impose on him/her.

**Total No. of Printed Pages : 24** *[उपर्युक्त निर्देश हिन्दी में अन्तिम आवरण पृष्ठ पर दिये गए हैं।]*

**ROUGH WORK**
**रफ़ कार्य**

# 12P/251/31

**No. of Questions : 150**

**प्रश्नों की संख्या : 150**

***Time : 2 Hours*** | ***Full Marks : 450***

***समय : 2 घण्टे*** | ***पूर्णाङ्क : 450***

**Note :** (1) Attempt as many q                    :an. Each question carries **3 (Three)** marks. ***On***                    ***.educted for each incorrect answer***. **Zero** mark will be awarded for each unattempted question.

अधिकाधिक प्रश्नों को हल करने का प्रयत्न करें। प्रत्येक प्रश्न **3 ( तीन )** अंक का है। ***प्रत्येक गलत उत्तर के लिए एक अंक काटा जायेगा।*** प्रत्येक अनुत्तरित प्रश्न का प्राप्तांक ***शून्य*** होगा।

(2) If more than one alternative answers seem to be approximate to the correct answer, choose the closest one.

यदि एकाधिक वैकल्पिक उत्तर सही उत्तर के निकट प्रतीत हों, तो निकटतम सही उत्तर दें।

**01.** ग्रन्थारम्भे 'भारती कवेर्जयति' इति समुचितेष्टदेवतां क: परामृशति ?

(1) भामह: (2) वाग्भट: (3) मम्मट: (4) रुय्यक:

**02.** प्रयोजनबहुत्वेऽपि किं नाम काव्यस्य सकल प्रयोजनमौलिभूतं प्रयोजनम् ?

(1) यश: (2) धनम् (3) व्यवहारज्ञानम् (4) सद्य:परनिर्वृति:

**03.** शक्तिर्निपुणतेत्यादिना काव्यहेतुत्वेन कति परिगणिता: काव्यप्रकाशे ?

(1) एक: (2) द्वौ (3) त्रय: (4) चत्वार:

**04.** 'य: कौमारहर: स एव हि वर' इत्यादौ रसस्य प्राधान्यात् स्फुट: कोलङ्कार: परिलक्षित: ?

(1) स्वभावोक्ति: (2) नकश्चित् (3) विशेषोक्ति: (4) असङ्गति:

**05.** शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं ............ स्मृतम् ।

(1) त्वपरं (2) त्ववरं (3) त्वधरं (4) त्वमरं

**06.** इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः।

अत्र बुधैः इति कैः ?

(1) मीमांसकैः (2) नैयायिकैः (3) वैयाकरणैः (4) छान्दसैः

**07.** काव्यप्रकाशे काव्यस्य प्रयोजन-कारण-स्वरूपविशेषनिर्णयो नाम कतम उल्लासः ?

(1) प्रथमः (2) द्वितीयः (3) चतुर्थः (4) सप्तमः

**08** वाच्यादनतिशायिनि व्यङ्ग्ये गुणीभूतव्यङ्ग्यं नाम काव्यं किंरूपं भवति ?

(1) उत्तमम् (2) मध्यमम् (3) अधमम् (4) साधारणम्

**09.** तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि। इत्यत्र किं नाम विशेष्यपदम् ?

(1) अदोषौ (2) शब्दार्थौ (3) सगुणौ (4) अनलङ्कृती

**10.** काव्यप्रकाशे शब्दः कतिधा निरूपितः ?

(1) पञ्चधा (2) चतुर्धा (3) त्रिधा (4) द्विधा

**11.** अभिहितान्वयवादिनां मतेन अपदार्थोऽपि वाक्यार्थः किमुच्यते ?

(1) तत्त्वार्थः (2) सारार्थः (3) गूढार्थः (4) तात्पर्यार्थः

**12.** वाच्य एव..........इत्यन्विताभिधानवादिनः ।

(1) तात्पयार्थ (2) वाक्यार्थ (3) तत्त्वार्थ (4) गूढार्थ

**13.** साक्षात्संकेतितं योर्थमभिधत्ते स..........।

(1) साधकः (2) बोधकः (3) वाचकः (4) सार्थकः

14. अर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या....... भवति ।

(1) व्यक्तिरेव (2) भक्तिरेव (3) शक्तिरेव (4) युक्तिरेव

15. "न हि गौ: स्वरूपेण गौ: नाप्यगौ:" इत्यादि कुत्रोक्तम् ?

(1) ब्रह्मसूत्रे (2) निरुक्ते (3) वाक्यपदीये (4) महाभाष्ये

16. "गौ: शुक्लश्चलो डित्थ इत्यादौ.........शब्दानां प्रवृत्ति: ।"

(1) गुणमयी (2) द्वितयी (3) त्रितयी (4) चतुष्टयी

17. स मुख्योऽर्थस्तत्र मुख्यो........स्याभिधोच्यते ।

(1) व्यापारो (2) व्याहारो (3) व्याघातो (4) व्याख्यार्थो

18. मुख्यार्थबाधे तद्योग रुढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा......रोपिता क्रिया।।

(1) चर्वणा (2) वर्णना (3) लक्षणा (4) भावार्था

19. प्रोक्ता कतिविधा काव्यप्रकाशे लक्षणा वद।

(1) द्विविधा (2) त्रिविधा (3) चतुर्विधा (4) षड्विधा

20. 'गौर्वाहीक:' इत्यत्र 'गौरयम' इत्यत्र च साधरणगुणाश्रयत्वेन ......एव लक्ष्यते इत्यपरे।

(1) पदार्थ (2) पद्यार्थ (3) परार्थ (4) वाच्यार्थ

21. अभिधेयाविनाभूत..........र्लक्षणोच्यते।
लक्षमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ।।

(1) प्रवृत्ति (2) प्रतीति (3) प्रस्तुति (4) विश्रान्ति

**22.** श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
........... कामिनीनां यौवनमद एव ललितानि ॥

(1) उपनयति (2) अनुसरति (3) अनुभवति (4) उपदिशति

**23.** ...........सहितं लक्षणीयं न युज्यते।

(1) विप्रकृष्टेन (2) भावहीनेन (3) प्रयोजनेन (4) फलहीनेन

**24.** प्रत्यक्षादेर्नीलादिर्विषय: फलं तु........संवित्तिर्वा।

(1) प्रकटता (2) निकटता (3) विकटता (4) घटकता

**25.** शब्दप्रमाणवोद्योऽर्थो व्यनक्त्यर्थान्तरं यत: ।
अर्थस्य व्यञ्जकत्वे तत् ........सहकारिता॥

(1) सिद्धस्य (2) शब्दस्य (3) शुद्धस्य (4) भावस्य

**26.** 'आयुर्घृतम्' 'आयुरेवेदम' इत्यादौ च..........कार्यकारणभावादि सम्बन्धान्तरम् ।

(1) सामर्थ्यादन्यत् (2) स्वीकृतादन्यत् (3) विरोधादन्यत् (4) साहश्यादन्यत्

**27.** नाभिधा......... भावात् हेत्वभावान्न लक्षणा ।

(1) समया (2) नियमा (3) सुविधा (4) व्यञ्जना

**28.** ज्ञानस्य......ह्यन्य: फलमन्यदुदाहृतम् ।

(1) साधको (2) बोधको (3) विषयो (4) कारको

**29.** अविवक्षितवाच्यो यस्तत्र...........भवेद्ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥

(1) वाच्यं (2) लक्ष्यं (3) व्यङ्ग्यं (4) तथ्यं

**30.** त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।

आत्मीयां मतिमास्थाय..........विधेहि तत् ॥

(1) गतिमत्र (2) भक्तिमत्र (3) स्थितिमत्र (4) भ्रान्तिमत्र

**31.** न खलु विभावानुभावव्यभिचारिण एव रस: । अपि तु रसस्तै: इत्यस्ति.........। स तु लाघवान्न लक्ष्यते ।

(1) विकल्प: (2) भ्रम: (3) सन्दर्भ: (4) क्रम:

**32.** ..........स तैर्विभावाद्यै: स्थायी भावो रस: स्मृत: ।

(1) सिद्ध: (2) व्यक्त: (3) स्फीत: (4) दृष्ट:

**33.** शृङ्गारवीरकरुणारौद्रवीरभयानका: ।

वीभत्साद्भुतसंज्ञौ चेत्यष्टौ ........रसा: स्मृता: ॥

(1) नाट्ये (2) काव्ये (3) लोके (4) सूत्रे

**34.** भावकत्वव्यापारेण भव्यमान: स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते इति .............।

(1) भरत: (2) भट्टलोल्लट: (3) भट्टनायक: (4) श्रीशङ्कुक:

**35.** अपरस्तु अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविध: ।

अत्र 'अपरस्तु' इति क: ?

(1) सम्भोग: (2) निर्वेद: (3) विप्रलम्भ: (4) शृङ्गार:

**36.** को नाम भावो व्यभिचारित्वेऽपि स्थायित्वमवलम्बते ?

(1) विषाद: (2) निर्वेद: (3) वितर्क: (4) आवेग:

**37.** शब्दशक्त्युद्भवो भावो ध्वनिः कतिधा निरूपितः काव्यप्रकाशे ?

(1) त्रिधा (2) चतुर्धा (3) नवधा (4) द्विधा

**38.** मम्मटेन समाख्यातः को नाम नवमो रसः ?

(1) शान्तः (2) प्रदीप्तः (3) मधुरः (4) वात्सल्यः

**39.** रतिर्देवादिविषया व्यभिचारी तथाञ्जितः । इति कः प्रोक्तः ?

(1) विभावः (2) अनुभावः (3) भावः (4) स्वभावः

**40.** ...........शान्तिरुदयः सन्धिः शवलता तथा।

(1) रसस्य (2) भावस्य (3) अर्थस्य (4) दोषस्य

**41.** अर्थशक्त्युद्भवो ध्वनिः कतिधा निरूपितः ?

(1) दशधा (2) नवधा (3) द्वादशधा (4) द्विधा

**42.** अविवक्षितवाच्यो ध्वनिः कतिधा उदाहृतः ?

(1) त्रिधा (2) द्विधा (3) अष्टधा (4) चतुर्धा

**43.** रसादीना..........त्वाद् भेद एको हि गण्यते ।

(1) मलक्ष्य (2) मनुक्त (3) मनन्त (4) मस्फुट

**44.** शब्दार्थोभयभूः कतिविधः ध्वनिः प्रकीर्तितः ?

(1) द्विविधः (2) त्रिविधः (3) षड्विधः (4) एकविधः

**45.** गुणीभूतव्यङ्ग्यस्य मध्यमकाव्यस्य कति भिदाः स्मृताः ?

(1) अष्टौ (2) नव (3) दश (4) त्रयः

**46.** अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ।।
इत्यत्र किं नाम गुणीभूतव्यङ्ग्यम् ?

(1) अगूढम् (2) अस्फुटम् (3) सन्दिग्धम् (4) असुन्दरम्

**47.** 'यत्पर: शब्द: स शब्दार्थ:' इति केषां मतम् ?

(1) वेदान्तिनाम् (2) नैयायिकानाम् (3) मीमांसकानाम् (4) सौगतानाम्

**48.** ............सर्वान् प्रतितॄन् प्रति एकरूप एव ।

(1) वाच्योऽर्थ: (2) भावार्थ: (3) व्यङ्ग्योऽर्थ: (4) लक्ष्योऽर्थ:

**49.** अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यास: ........भेदश्च ।

(1) स्वरूप (2) कारण (3) वर्णन (4) विग्रह

**50.** किमिति च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां...........बलीयस्त्वम् ।

(1) पूर्वपूर्व (2) उत्तरोत्तर (3) यथास्थिति (4) यथाविधि

**51.** लक्षणीयस्यार्थस्य नानात्वेऽपि अनेकशब्दार्थाभिधेयवत् ................एव ।

(1) अनन्तत्वम् (2) अनियतत्वम् (3) नियतत्वम् (4) विरुद्धत्वम्

**52.** शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम् ।
............प्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयो: ।।

(1) रस (2) गुण (3) दोष (4) शब्द

**53.** ............हतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्य: ।

(1) लक्ष्यार्थ (2) वाच्यार्थ (3) वाक्यार्थ (4) मुख्यार्थ

**54.** सुरस्त्रोतस्विनीमेष हन्ति सम्प्रति सादरम् ।
अत्र क: पददोष: ?

(1) अप्रयुक्तम् (2) असमर्थम् (3) निरर्थकम् (4) निहतार्थम्

**55.** उक्तं हि ध्वनिकृता "अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥" इति ।
अत्र को नाम ध्वनिकृत् ?

(1) व्यास: (2) भरत: (3) आनन्दवर्धन: (4) वाग्भट;

**56.** आश्रयैक्ये............य: स कार्यो भिन्नसंश्रय: ।
रसान्तरेणान्तरितो नैरन्तर्येण यो रस: ॥

(1) विरुद्धौ (2) नुकूलो (3) प्रकृष्टो (4) विलुप्तो

**57.** न ......... स्वपदेनोक्तावपि सञ्चारिण: क्वचित् ।

(1) सिद्धि: (2) गुण: (3) दोष: (4) व्याप्ति:

**58.** काव्यप्रकाशे दोषदर्शनो नाम कतम उल्लास: ?

(1) षष्ठ: (2) सप्तम: (3) चतुर्थ: (4) नवम:

**59.** ये रसस्याङ्गिनो धर्मा: शौर्यादय इवात्मन: ।
............हेतवस्ते स्युरचलस्थितयो गुणा: ॥

(1) उद्धार (2) उत्साह (3) उत्थान (4) उत्कर्ष

**60.** उपकुर्वन्ति तं सन्तं ये..............जातुचित् ॥

हारादिवदलङ्कारास्तेऽनुप्रासोपमादय:॥

(1) ङ्गहारेण (2) ङ्गद्वारेण (3) ङ्गदानेन (4) ङ्गाङ्गित्वेन

**61.** "रीति: काव्यस्यात्मा" इति मतं कस्य ? यन्निराकुरुते मम्मट: ?

(1) वामनस्य (2) दण्डिन: (3) भामहस्य (4) भोजस्य

**62.** अङ्गीकृता: कति गुणा मम्मटेन यथायथम् ?

(1) षड्गुणा: (2) दशगुणा: (3) त्रयोगुणा: (4) पञ्चगुणा:

**63.** आह्लादकत्वं .........शृङ्गारे द्रुतिकारणम् ।

(1) सौन्दर्यं (2) माधुर्यं (3) विज्ञानं (4) शब्दानां

**64.** करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् । अत्र तदिति किम् ?

(1) सान्निध्यम् (2) सौन्दर्यम् (3)साधर्म्यम् (4) माधुर्यम्

**65.** को नामासौ गुण: प्रोक्त: सर्वत्र विहितस्थिति: ?

(1) श्लेष: (2) प्रसाद: (3) समाधि: (4) समता

**66.** यत्र श्रुतिमात्रेण शब्दा: अर्थबोधका: भवन्ति तत्र मम्मटेन को नाम गुण: स्वीकृत: ?

(1) अर्थव्यक्ति: (2) कान्ति: (3) प्रसाद: (4) उदारत्वम्

**67.** काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयो नाम कतम उल्लास: ?

(1) दशम: (2) नवम: (3) सप्तम: (4) अष्टम:

**68.** यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते ।
श्लेषेण काक्वा वा ज्ञेया सा ....... स्तथा द्विधा ॥

(1) श्लेषोक्ति (2) विज्ञप्ति (3) वक्रोक्ति (4) द्विरुक्ति

**69.** स्वरवैसादृश्येऽपि...............सदृशत्वं वर्णसाम्यम् ।
रसाद्यनुगत: प्रकृष्टो न्यासोऽनुप्रास: ।

(1) व्यञ्जन (2) लक्षण (3) वर्णन (4) वक्रोक्ति

**70.** माधुर्यव्यञ्जकैर्वर्णैः का वृत्तिः परिकीर्तिता ?

(1) कोमला (2) परुषा (3) उपनागरिका (4) ग्राम्या

**71.** वाच्यभेदेन भिन्नाः युगपद्भाषणस्पृशः शब्दाः यत्
श्लिष्यन्ति स श्लेषः अक्षरादिभिः कतिधा निरूपितः ?

(1) सप्तधा (2) अष्टधा (3) दशधा (4) द्वादशधा

**72.** काव्यप्रकाशे शब्दालङ्कारनिर्णयो नाम कतम उल्लासः ?

(1) नवमः (2) अष्टमः (3) सप्तमः (4) दशमः

**73.** काव्यप्रकाशे कतिधा परिगणितो लाटानुप्रासः ?

(1) त्रिधा (2) चतुर्धा (3) पञ्चधा (4) नवधा

**74.** दृश्यते यत्र वर्णानां खड्गाद्याकृतिहेतुता ।
को नाम तत्रालङ्कारो मम्मटेन निरूपितः ॥

(1) श्लेषः (2) अनुप्रासः (3) वक्रोक्तिः (4) चित्रम्

**75.** काव्यप्रकाशे लटानुप्रासः कतिधा मतः ?

(1) पञ्चधा (2) चतुर्धा (3) त्रिधा (4) द्विधा

**76.** अर्थे सत्यर्थभिन्नानां वर्णनां तेनैव क्रमेण पुनः श्रुतिः को नामालङ्कारः ?

(1) पर्यायः (2) यमकम् (3)सहोक्तिः (4) समासोक्तिः

**77.** उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं
भवतीति तयोरेव समानेन धर्मेण सम्बन्धः कोऽलङ्ककारः ?

(1) उपमेयोपमा (2) रूपकम् (3) उपमा (4) उत्प्रेक्षा

**78.** उपमेयोपमेयत्वे एकस्यैवैकवाक्यगे ।
विभावयत को नामालङ्कार: परिकीर्तित: ?
(1) उपमा (2) उपमेयोपमा (3) सहोक्ति: (4) अनन्वय:

**79.** तद्रूपक.........य उपमानोपमेययो: ।
(1) मनिन्द्यो (2) मभेदो (3) मलभ्यो (4) मनुक्तो

**80.** लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ: ।
मम्मटेनात्र को नाम अलङ्कार उदाहृत: ?
(1) उत्प्रेक्षा (2) रूपकम् (3) अनुमानम् (4) समाधि:

**81.** "विपर्यास उपमेयोपमा तयो:' इत्यत्र तयोरितिपदेन कयोर्निर्देश: ?
(1) गुणगुणिनो: (2) कार्यकारणयो: (3) उपभानोपमेययो: (4) आधारधेययो:

**82.** "ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशय: । "
अलङ्कारस्य कस्येदं लक्षणं सूत्रसम्मतम्
(1) ससन्देह: (2) भेदोक्ति: (3) तदनुक्ति: (4) संशय:

**83.** प्रकृतं यन्निषिध्यान्यत् साध्यते सा........................।
(1) त्वसङ्गति: (2) त्वपह्नुति: (3) विभावना (4) निदर्शना

**84.** 'एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोर्थ:' सोयं को नामालङ्कार: ?
(1) दृष्टान्त: (2) समुच्चय: (3) परिकर: (4) श्लेष:

**85.** क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति: ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥
मम्मटेनात्र वदत कोलङ्कार उदाहृत: ?
(1) निदर्शना (2) असङ्गति: (3) व्याघत: (4) परिवृत्ति:

**86.** 'सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।

कोसौ भवत्यलङ्कारः ?

(1) विशेषोक्तिः (2) संसृष्टिः (3) प्रतिवस्तूपमा (4) विशेषः

**87.** ................पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ।

(1) पर्यायः (2) दृष्टान्तः (3) विरोधः (4) आक्षेपः

**88.** उपमानाद्यदन्यस्य.............स एव सः ।

(1) समाख्यानं (2) दोषारोपः (3) व्यतिरेकः (4) परामर्शः

**89.** निषेधो वक्तुमिष्टस्य यो विशेषाभिधत्सया ।

वक्ष्यमाणोक्तविषस्यः स ..................द्विधामतः।।

(1) आक्षेपो (2) विरोधो (3) व्याघातो (4) निषेधो

**90.** क्रियायाः प्रतिषेधेऽपि फलव्यक्ति..................।

(1) र्विपर्थयः (2) र्विशेषता (3) र्विरूपता (4) र्विभावना

**91.** ..................क्रमेणैव क्रमिकाणां समन्वयः ।

(1) यथासंख्यं (2) प्रत्यनीकं (3) काव्यलिङ्गं (4) व्यतिरेकः

**92.** विरोधो नामालङ्कारः कतिधा विभज्य उदाहृतः काव्यप्रकाशे ?

(1) अष्टाधा (2) दशधा (3) चतुर्धा (4) द्विधा

**93.** 'प्रत्यक्षा इव यद् भावाः क्रियन्ते भूतभाविनः ।'

अलङ्कारस्य तद्ब्रूत नाम मम्मटसम्मतम् ?

(1) दीपकम् (2) मीलितम् (3) भाविकम् (4) उत्तरम्

94. 'बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेप्येष मृगशावाक्षि लक्ष्यते' ॥
इति को नामालङ्कार उदाहृत: ?

(1) पर्याय: (2) तद्गुण: (3) विषम: (4) परिकर:

95. '............विना वाच्यवाचकत्वेन यद्वच: ।'

(1) काव्यलिङ्गम् (2) पर्यायोक्तम् (3) अनुमानम् (4) उदात्तम्

96. मानमस्या निराकर्तुं पादयोर्मे पतिष्यत: ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥ अत्र कोलङ्कार: ?

(1) विरोध: (2) व्याघात: (3) विषम; (4) समाधि:

97. "अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥"
अलङ्कारं चिनुष्वात्र मम्मटोदाहृतं धिया ?

(1) दीपकम् (2) अधिकम् (3) मीलितम् (4) उदात्तम्

98. 'यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृति:' इति कोऽलङ्कार: ?

(1) स्मरणम् (2) भाविकम् (3) अनुमानम् (4) उदात्तम्

99. यद्यथा साधितं केनाप्यपरेण तदन्यथा ।
तथैव यद्विधीयेत स..............इति स्मृत: ॥

(1) तद्गुण (2) विरोध (3) व्याघात (4) दृष्टान्त

100. उत्तरश्रुतिमात्रत: प्रश्नस्योन्नयनं यत्र क्रियते तत्र कोऽलङ्कार: ?

(1) सूक्ष्म: (2) उत्तरम् (3) सार: (4) संसृष्टि:

**101.** अखिलनिगमात् सारं उद्धृत्य उद्धृत्य नाट्यवेदं कश्चक्रे ?

(1) नीलकण्ठः (2) भरतः (3) शर्वाणी (4) विरिञ्चिः

**102.** आनन्दनिस्यन्दिषु................व्युत्पत्तिमात्रं फलमल्पबुद्धिः ।

(1) नर्तनेषु (2) केजितेषु (3) रूपकेषु (4) दर्शनेषु

**103.** किं तत्पदार्थाभिनयात्मकं यन्मार्ग उच्यते ।

(1) नृत्तम् (2) नृत्यम् (3)वाद्यम् (4) गीतम्

**104.** सानुबन्धं.............ख्यं प्रकरी च प्रदेशभाक् ।

(1) निबन्धा (2) प्रबन्धा (3) पताका (4) प्रमोदा

**105.** प्रख्यातमितिहासादे.........कविकल्पितम् ।

(1) उत्पाद्यं (2) राख्यानं (3) विंख्यातं (4) विंकृतं

**106.** कार्यं..................स्तच्छुद्धमेकानेकानुबन्धि च ।

(1) विसर्ग (2) प्रसाद (3) त्रिवर्ग (4) स्वधर्म

**107.** रूपकेषु समाख्याता अर्थप्रकृतयः कति ?

(1) त्रयः (2) पञ्च (3) अष्टौ (4) दश

**108.** मुखसन्धेः बीजारम्भसमन्वयात् कति अङ्गानि भवन्ति ?

(1) दश (2) एकादश (3) द्वादश (4) त्रयोदश

**109.** कस्य लक्ष्यालक्ष्यतयोद्भेदः प्रतिमुखं स्मृतम् ?

(1) बीजस्य (2) कार्यस्य (3) कारणस्य (4) फलस्य

**110.** गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः ।

द्वादशाङ्गः ............स्यान्न वा स्यात् प्राप्तिसम्भवः ॥

(1) प्रवृत्तिः (2) प्रकर्षः (3) पताका (4) प्रयोगः

**111.** बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।

एकार्थ्यमुपनीयन्ते यत्र ........हि तत् ॥

(1) निष्क्रमणं (2) निर्वहणं (3) संहरणं (4) प्रख्यापनं

**112.** द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः ।

..............भवेतु किञ्चित् दृश्यश्रव्यमथापरम् ॥

(1) गोप्यमेव (2) दृश्यमेव (3) श्रव्यमेव (4) सूच्यमेव

**113.** अर्थोपक्षेपकैः सूच्यं..........प्रतिपादयेत् ।

(1) दशभिः (2) पञ्चभिः (3) चतुर्भिः (4) सप्तभिः

**114.** वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।

संक्षेपार्थस्तु विष्कम्भो............पात्रप्रयोजितः ॥

(1) मुख्य (2) नीच (3) मध्य (4) दिव्य

**115.** अन्तर्जवनिकासंस्थैः नेपथ्यपात्रैरेव अर्थसूचनं किमभिधीयते ?

(1) अङ्कास्यम् (2) अङ्कावतारः (3) प्रवेशकः (4) चूलिका

**116.** वृत्तवर्तिष्यमाणकथांशानां अङ्कद्वयस्यान्तर्निविष्टः नीचपात्र प्रायोजितः अर्थोपक्षेपकः किमभिधानः प्रकीर्तितः ?

(1) प्रवेशकः (2) विष्कम्भः (3) चूलिका (4) अङ्कावतारः

117. नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते ।

मदाभोगधनध्वानो..........ताण्डवे ॥

(1) दशग्रीवस्य (2) वीरभद्रस्य (3) नीलकण्ठस्य (4) वक्रतुण्डस्य

118. दशरूपककर्तारं नाम्ना निर्दिशताऽधुना ।

(1) भरतः (2) भोजराजः (3) धनिकः (4) धनञ्जयः

119. नाट्यधर्मापेक्षया नियतश्राव्यं कतिधा भवति ?

(1) द्विधा (2) त्रिधा (3) चतुर्धा (4) पञ्चधा

120. कथामन्तरा त्रिपताकाकरेण अन्यान् अपवार्य अन्योन्यामन्त्रणं किमुच्यते ?

(1) स्वगतम् (2) अपवारितम् (3) जनान्तिकम् (4) आकाशभाषितम्

121. आ परितोषाद् विदुषां न साधु मन्ये ........विज्ञानम् ।

(1) प्रबन्ध (2) प्रयोग (3) प्रमाण (4) प्रसाद

122. अथवा भवितव्यानां.............भवन्ति सर्वत्र।

(1) पात्राणि (2) सूत्राणि (3) द्वाराणि (4) तन्त्राणि

123. गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।

चीनांशुकमिव केतोः ..................नीयमानस्य ॥

(1) प्रतिकूलं (2) प्रतिभवनं (3) सुरनगरीं (4) प्रतिवातं

124. सतां हि सन्देहपदेषु वस्तुषु............मन्तःकरणप्रवृत्तयः ॥

(1) प्रधान (2) प्रमाण (3) सन्धान (4) सिद्धान्त

**125.** अभिज्ञानशाकुन्तले कति अङ्का सन्ति ?

(1) चत्वार: (2) पञ्च (3) षट् (4) सप्त

**126.** अभिज्ञानशाकुन्तले विदूषकस्य नाम स्मरत साम्प्रतम् ।

(1) माणवक: (2) माधव्य: (3) वसन्तक: (4) मैत्रेय:

**127.** कस्मिन् अङ्के शकुन्तला मनोगतं गीतवस्तु नलिनीपत्रे नखैर्निक्षिप्तवर्णं करोति ?

(1) प्रथमे (2) द्वितीये (3) तृतीये (4) पञ्चमे

**128.** 'यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया'' इति कस्य वचनम् ?

(1) गौतस्य (2) कण्वस्य (3) सोमरातस्य (4) मातले:

**129.** अत: परीक्ष्य कर्तव्यं विशेषात् सङ्गतं रह: ।

............हृदयेष्वेवं वैरीभवति सौहृदम् ।।

(1) अदृष्ट (2) अनिष्ट (3)अमित्र (4) अज्ञात

**130.** आकाशयानेन सानुमती नामाप्सारा: कस्मिन्नङ्के प्रविशति ?

(1) तृतीये (2) पञ्चमे (3) षष्ठे (4) सप्तमे

**131.** शकुन्तलाया: हस्तात् परिभ्रष्टम् अङ्गुलीयकं पुन: कस्मिन्नङ्के राज्ञा आसादितम् ?

(1) चतुर्थे (2) पञ्चमे (3) षष्ठे (4) सप्तमे

**132.** येन येन वियुज्यन्ते प्रजा: स्निग्धेन बन्धना ।

स स ...........तासां दुष्यन्त इति घुष्यताम् ।।

(1) शापदृते (2) पापादृते (3) कोपादृते (4) दोषादृते

133. स्रजमपि................क्षिप्तां धुनोत्यहिशङ्कया ।

(1) शिरस्यन्धः (2) वपुष्यन्धः (3) कुतोप्यन्धः (4) शिखास्वन्धः

134. मघवतः सकाशात् केन सह मनुष्यलोकमवतरति दुष्यन्तः ?

(1) जानुकेन (2) माधव्येन (3) गौतमेन (4) मातलिना

135. 'श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम् इति को निरुपयति ?

(1) अदितिः (2) मातलिः (3) मारीचः (4) कण्वः

136. मुनिः किमभिधानोऽसौ नाट्यशास्त्रं चकार यः ?

(1) महेश्वरः (2) भरतः (3) भूरिश्रवाः (4) नारदः

137. कः काव्यं बुद्धचरितं नामाविष्कृतवान् कविः ?

(1) अश्वघोषः (2) बुद्धघोषः (3) नन्दिघोषः (4) वररुचिः

138. को मृच्छकटिकं नाम चक्रे प्रकरणं कविः ?

(1) भासः (2) वररुचिः (3) शूद्रकः (4) मुरारिः

139. का मृच्छकटिकेऽङ्कानां सांख्या गणय साम्प्रतम् ।

(1) पञ्च (2) सप्त (3) अष्टौ (4) दश

140. रघुवंशे महाकाव्ये सर्गसंख्याऽभिधीयताम् ?

(1) द्वादश (2) अष्टादश (3) एकोनविंशतिः (4) विंशतिः

141. अर्थगौरवसम्पन्नं काव्यं किं नाम भारवेः ?

(1) जानकीहरणम् (2) किरातार्जुनीयम् (3)सौन्दरनन्दम् (4) रामचरितम्

**142.** निबद्धा बाणभट्टेन का नामातिद्वयी कथा ?

(1) बृहत्कथा (2) कादम्बरी

(3) वासवदत्ता (4) अवन्तिसुन्दरीकथा

**143.** रत्नावलीति कस्येयं विश्रुता नाटिका कवेः ?

(1) भासस्य (2) जयदेवस्य (3) श्रीहर्षस्य (4) मुरारेः

**144.** उत्तरे रामचरिते कविः कोऽयं विशिष्यते ?

(1) अश्वघोषः (2) कालिदासः (3) जयदेवः (4) भवभूतिः

**145.** काव्ये कस्मिन् समाख्याताः काव्यविद्भिस्त्रयो गुणाः ?

(1) शिशुपालवधे (2) किरातार्जुनीये (3) रघुवंशे (4) रामचरिते

**146.** कोऽसौ यो गीतगोविन्दं रचयामास सत्कविः ?

(1) कविपुत्रः (2) श्रीहर्षः (3) जयदेवः (4) मुरारिः

**147.** राजन्ते ऋतुसंहारे सर्गाः कति वदाधुना ।

(1) पञ्च (2) षट् (3) सप्त (4) अष्टौ

**148.** ध्वन्यालोकाभिधानं कः ससर्ज ग्रन्थमुत्तमम् ?

(1) भामहः (2) वामनः (3) दण्डी (4) आनन्दवर्धनः

**149.** काव्यलक्षणमुद्दिश्य विश्वनाथेन धीमता ।

को नाम रचितो ग्रन्थः समुदाहर साम्प्रतम् ॥

(1) दशरूपकम् (2) साहित्यदर्पणः (3) काव्यप्रकाशः (4) काव्यमीमांसा

**150.** रसगङ्गाधरग्रन्थकर्तुर्नामाभिधीयताम् ?

(1) आनन्दवर्धनः (2) पण्डितराज जगन्नाथः

(3) कविराजविश्वनाथः (4) राजानकरुय्यकः

**ROUGH WORK**
रफ़ कार्य

# अभ्यर्थियों के लिए निर्देश

*(इस पुस्तिका के प्रथम आवरण पृष्ठ पर तथा उत्तर-पत्र के दोनों पृष्ठों पर केवल नीली-काली बाल-प्वाइंट पेन से ही लिखें)*

1. प्रश्न पुस्तिका मिलने के 10 मिनट के अन्दर ही देख लें कि प्रश्नपत्र में सभी पृष्ठ मौजूद हैं और कोई प्रश्न छूटा नहीं है। पुस्तिका दोषयुक्त पाये जाने पर इसकी सूचना तत्काल कक्ष-निरीक्षक को देकर सम्पूर्ण प्रश्नपत्र की दूसरी पुस्तिका प्राप्त कर लें।
2. परीक्षा भवन में ***लिफाफा रहित प्रवेश-पत्र के अतिरिक्त,*** लिखा या सादा कोई भी खुला कागज साथ में न लायें।
3. ***उत्तर-पत्र अलग से दिया गया है। इसे न तो मोड़ें और न ही विकृत करें। दूसरा उत्तर-पत्र नहीं दिया जायेगा। केवल उत्तर-पत्र का ही मूल्यांकन किया जायेगा।***
4. अपना अनुक्रमांक तथा उत्तर-पत्र का क्रमांक प्रथम आवरण-पृष्ठ पर पेन से निर्धारित स्थान पर लिखें।
5. ***उत्तर-पत्र के प्रथम पृष्ठ पर पेन से अपना अनुक्रमांक निर्धारित स्थान पर लिखें तथा नीचे दिये वृत्तों को गाढ़ा कर दें। जहाँ-जहाँ आवश्यक हो वहाँ प्रश्न-पुस्तिका का क्रमांक तथा सेट का नम्बर उचित स्थानों पर लिखें।***
6. ***ओ० एम० आर० पत्र पर अनुक्रमांक संख्या, प्रश्नपुस्तिका संख्या व सेट संख्या (यदि कोई हो) तथा प्रश्नपुस्तिका पर अनुक्रमांक और ओ० एम० आर० पत्र संख्या की प्रविष्टियों में उपरिलेखन की अनुमति नहीं है।***
7. ***उपर्युक्त प्रविष्टियों में कोई भी परिवर्तन कक्ष निरीक्षक द्वारा प्रमाणित होना चाहिये अन्यथा यह एक अनुचित साधन का प्रयोग माना जायेगा।***
8. ***प्रश्न-पुस्तिका में प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं। प्रत्येक प्रश्न के वैकल्पिक उत्तर के लिए आपको उत्तर-पत्र की सम्बन्धित पंक्ति के सामने दिये गये वृत्त को उत्तर-पत्र के प्रथम पृष्ठ पर दिये गये निर्देशों के अनुसार पेन से गाढ़ा करना है।***
9. प्रत्येक प्रश्न के उत्तर के लिए केवल एक ही वृत्त को गाढ़ा करें। एक से अधिक वृत्तों को गाढ़ा करने पर अथवा एक वृत्त को अपूर्ण भरने पर वह उत्तर गलत माना जायेगा।
10. ***ध्यान दें कि एक बार स्याही द्वारा अंकित उत्तर बदला नहीं जा सकता है। यदि आप किसी प्रश्न का उत्तर नहीं देना चाहते हैं, तो संबंधित पंक्ति के सामने दिये गये सभी वृत्तों को खाली छोड़ दें। ऐसे प्रश्नों पर शून्य अंक दिये जायेंगे।***
11. रफ कार्य के लिए प्रश्न-पुस्तिका के मुखपृष्ठ के अंदर वाला पृष्ठ तथा उत्तर-पुस्तिका के अंतिम पृष्ठ का प्रयोग करें।
12. परीक्षा के उपरान्त *केवल* ***ओ एम आर उत्तर-पत्र*** परीक्षा भवन में जमा कर दें।
13. परीक्षा समाप्त होने से पहले परीक्षा भवन से बाहर जाने की अनुमति नहीं होगी।
14. यदि कोई अभ्यर्थी परीक्षा में अनुचित साधनों का प्रयोग करता है, तो वह विश्वविद्यालय द्वारा निर्धारित दंड का/की, भागी होगा/होगी।